National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2026;** 1(66): 152-155
© 2026 NJHSR
www.sanskritarticle.com

**श्री गगनदीपः**
साहाय्याध्यापकः (संविदा),
केन्द्रीयसंस्कृतविश्वविद्यालयः,
शृङ्गेरी

**Correspondence:**
**श्री गगनदीपः**
साहाय्याध्यापकः (संविदा),
केन्द्रीयसंस्कृतविश्वविद्यालयः,
शृङ्गेरी

# लक्षणापेक्षाविमर्शः

**श्री गगनदीपः**

**शोधसारः**

भारतीयदर्शनपरम्परायां पदार्थस्वरूपनिर्णये लक्षणस्य महत्त्वपूर्णं स्थानमभ्युपगम्यते। तथापि पदार्थज्ञानस्य सर्वत्र लक्षणजन्यत्वम् अथवा लक्षणापेक्षत्वमिति विषयः दार्शनिकाणां मध्ये विवादविषयतया प्रतिष्ठितः। प्रस्तुते शोधे लक्षणस्वरूपस्य, तस्य प्रयोजनस्य तथा च तदपेक्षाया युक्तिसिद्धत्वस्य समीक्षात्मकं परिशीलनं विहितम्। विशेषतः नैयायिकैरभ्युपगतस्य लक्षणापेक्षावादस्य श्रीहर्षमिश्रविरचिते खण्डनखण्डखाद्ये कृतं खण्डनं विस्तरेण विवेचितम्। अत्र लक्षणस्य व्यावर्तकत्वेऽपि पदार्थज्ञानहेतुत्वस्य सार्वत्रिकत्वं निरस्तं, व्यवहारसिद्धौ च तदनिवार्यताया असङ्गतिः प्रदर्शिता। इत्थं च पदार्थप्रतीतेः लक्षणानपेक्षत्वमुपपाद्य, लक्षणस्य केवलोपकारकत्वमेव न तु सर्वत्रावश्यकत्वमिति सिद्धान्तः सम्यग् निरूपितः।

**प्रस्तावना**

भारतीयतर्कपरम्परायां पदार्थस्य स्वरूपनिर्णयार्थं लक्षणस्य महत्त्वं प्रायेण सर्वैः अङ्गीकृतम्। लक्षणं विना कस्यापि वस्तुनः वास्तविकं ज्ञानं न सम्भवति, यतोहि लक्षणमेव व्यावृत्तिं साधयति। तथापि लक्षणं नाम किम्, तस्य प्रयोजनं कियत्, पदार्थज्ञानोत्पत्तौ तदपेक्षा सर्वदा भवति वा इत्यादयः प्रश्नाः दार्शनिकानां विमर्शेषु बहुधा चर्चिताः सन्ति। न्यायमते लक्षणस्य मुख्यं प्रयोजनं सजातीय-विजातीय-व्यावृत्तिः व्यवहारसिद्धिश्च अस्ति। तत्र "असाधारणधर्मो लक्षणम्" इति स्वीक्रियते, येन अलक्षितस्य वस्तुनः इतरस्मात् भेदः प्रकटीभवति।

अस्यां पृष्ठभूमौ प्रस्तुते शोधपत्रे लक्षणस्वरूपस्य, तस्य प्रयोजनस्य, तथा लक्षणापेक्षाया अनिवार्यतानिरूपकानां विविधमतानां समीक्षात्मकं परिशीलनं विहितम्। विशेषतः अद्वैतपरम्परायां खण्डनखण्डखाद्यकारैः श्रीहर्षमिश्रैः लक्षणस्य अनिवार्यत्वविषये सूक्ष्मः विचारः प्रस्तुतः, यत्र पदार्थप्रतीतिः सर्वदा लक्षणज्ञानाधीना न भवतीति युक्तिपूर्वकं प्रतिपाद्यते। श्रीहर्षस्य मते नैयायिकोक्तानि लक्षणानि सदोषानि सन्ति। यदि लक्षणस्य लक्षणमेव निर्दोषं न भवेत्, तर्हि तेन लक्ष्यसिद्धिः कथं सम्भवेत्? अद्वैतवेदान्ते वस्तुतः अखण्ड-सच्चिदानन्द-स्वरूपस्य ब्रह्मणः साक्षात्कारात् पूर्वं व्यावहारिकजगतः पदार्थानां अनिर्वचनीयत्वं प्रदर्श्यते। अतः खण्डनखण्डखाद्ये प्रतिपादितयुक्तीनामाधारेण लक्षणस्य वास्तविकस्थानं दार्शनिकदृष्ट्या व्यावहारिकसत्तामात्रे निरूपयितुं यत्नः कृतः। एतेन विचारेण दार्शनिकक्षेत्रे लक्षणशास्त्रस्य एका नवीना गम्भीरा च विमर्शसरणिः उद्घाटिता दृश्यते, या साधकस्य बौद्धिकविकासाय अतीव उपकारिका वर्तते॥

**कूटशब्दाः**

व्यावृत्तिः, अतिव्याप्त्यादिदूषणत्रयरहितत्वम्, इतरभेदानुमितिजनकतावच्छेदकविषयताश्रयत्वम्, स्वस्य स्वव्यापकत्वम्, विशेषतत्तद्धर्मावच्छिन्नव्यावृत्तिजनकत्वम्, सिद्धसाधनदोषग्रस्तः, सिषाधयिषाविरहत्वम्, असम्भवदुक्तिकम्, मानान्तरलक्षणादिजन्यत्वेन, अनवस्थाप्रसङ्गः,साक्षात्कारित्वात्, प्रत्यक्षत्वव्यवहारः, इत्यादयः॥

**लक्षणापेक्षाविचारः**

लोकवेदयोः यो यः व्यवहारः दृष्टः सः सर्वोपि व्यावृत्तिपूर्वकतया एव लक्ष्यते। सा च व्यावृत्तिः सर्वदा लक्षणप्रमाणाधीना इति तु सर्वशास्त्राभिमतम् एव। अत एव **लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः**[1] इति नियमोपि उपस्थापितः। तच्च लक्षणं कीदृशम् इति जिज्ञासायां लक्षणस्यापि लक्षणम् उच्यते। तदिह लक्षणलक्षणविचारः प्रस्तूयते।

अन्नम्भट्टाचार्यैः लक्षणस्य लक्षणम् अतिव्याप्त्यादिदूषण-त्रयरहितधर्मत्वं लक्ष्यतावच्छेदकसमनियतत्त्वम् इति प्रोक्तम्। समनियतत्वं च तद्व्याप्यत्वे सति तद्व्यापकत्वम्, अर्थात् लक्ष्यतावच्छेदक-अधिकरणवृत्त्यन्ताभाव-अप्रतियोगित्वे सति लक्ष्यतावच्छेदकाभावाधिकरण- वृत्त्यन्ताभावप्रतियोगित्वम्।

यथा गोः गोत्वावच्छेदेन सास्नादिमत्त्वे लक्षणे क्रियमाणे लक्ष्यतावच्छेदकरूप- गोत्वाधिकरणवृत्ति- अत्यन्ताभाव- अप्रति-योगित्वे सति गोत्वाभावाधिकरणवृत्ति- अत्यन्ताभावप्रतियोगित्वस्य सत्त्वात् तत् सल्लक्षणम्।

ननु प्रतिज्ञातं तावत् त्वया व्यावर्तकं लक्षणम् इति। व्यावृत्तौ, अर्थात् इतरभेदे गोत्वाधिकरणवृत्ति- अत्यन्ताभाव- अप्रतियोगित्वं वर्तते, गवि गवि गोभेदस्य असत्त्वात्। गोत्वाभावाधिकरण-वृत्त्यन्ताभाव- प्रतियोगित्वं च गवेतरे सर्वत्र इतरभेदस्य असत्त्वात्। अतः लक्ष्यतावच्छेदकसमनैयतस्य व्यवृत्तावपि सत्त्वात् अस्मिन् पक्षे, गवादीनां व्यावृत्त्याख्ये इतरभेदे, पदार्थस्य अभिधेयत्वे च लक्षणे क्रियमाणे तयोः व्यावर्तकत्वाभावात् अलक्ष्यत्वम्। तादृशे अलक्ष्ये लक्षणसत्त्वात् च अतिव्यातिः स्यात्।

व्यावर्तकत्वं च इतरभेदानुमितिजनकतावच्छेदकविषयताश्रयत्वम्[2]। स्वस्य स्वव्यापकत्वम् इति नियमाधारेण गोत्वे अपि लक्षणलक्षणास्य अतिव्याप्तिः प्रसज्येत।

एतादृश्याः अतिव्याप्त्याः वारणाय नातियतामहे। तद्भिन्नत्वदलम् एव एतच्छुद्धी करणाय अलं भवेत्। लक्ष्यतावच्छेदक- व्यावृत्ति-अभिधेयत्वादिभिन्नत्वे सति लक्ष्यतावच्छेदकसमनियतत्वं विवक्षितम्। किञ्च, यद्यपि व्यावर्तकमेव लक्षणम् इति प्रतिज्ञातं तथाऽपि, लोके व्यवहारसाधनम् अपि लक्षणं दृष्टम्। व्यवकर्तव्यज्ञानं विना तद्रूपावच्छिन्नबोधकशब्दरूपव्यवहारस्य असम्भवात्, लक्षणस्य व्यवहारः अपि प्रयोजनम् एव इति अभ्युपेयम्। व्यवहारसाधकत्वं च व्यावृत्तौ, प्रमेयत्वादौ लक्ष्यतावच्छेदके गोत्वादौ च वर्तते इत्यतः तेषामपि लक्षणत्वम् इष्टमेव। अतः लक्षणलक्षणलक्ष्यकोटौ तेषामपि अन्तर्भावात् त्वदुक्तः पूर्वपक्षः इष्टापत्तये कल्पते, न तु दोषाय।

त्वदुक्तरीत्या एव लक्षणलक्षणलक्ष्यतावच्छेदकं व्यावर्तकत्वम्। तच्च इतरभेद-अनुमापकत्वम्। इदं च गोत्वे प्रमेयत्वादौ व्यावृत्तौ चापि वर्तते एव इति कृत्वा त्वदुक्ता अतिव्याप्तिः असङ्गता स्यात्। यत्किञ्चिद्व्यावर्तकतया अर्थात्, उभयत्वावच्छिन्नप्रतियोगिकअन्योन्या-भावसाधकतया प्रमेयत्वादीनामपि इतरभेदअनुमाप-कत्वम्।

ननु, यत्किञ्चिद्व्यावृत्तिः यद्यत्र विवक्षिता स्यात्, तर्हि लक्षणे व्यापकत्वादिघटितत्वं समनियत्वं व्यर्थं स्यात्। यतः लक्ष्यतावच्छेदक-गोत्वादि- अव्यापको यः धर्मः शुक्लगोत्वादिः, तेनापि यत्किञ्चित्कृष्णगवादिव्यावृत्तिः जायते एव। अतः विशेषतत्तद्धर्मा-वच्छिन्नव्यावृत्तिरेव अत्र वक्तव्या।

एवं सत्यपि विशेषतत्तद्धर्मावच्छिन्नगोत्वादिसमनियतत्वं प्रमेयत्वादौ नास्तीति कृत्वा तत्र अतिव्याप्तेः अस्ङ्गतत्वं तदवस्थमेव। एवं व्यावृत्तावपि दोषं वारयामः। व्यावृत्तिस्तावत् न केवलं यत्किञ्चिद्व्यावृत्तेः अनुमापिका, किन्तु गोत्वावच्छिन्नः भेदः यत्र अश्वत्वाद्यवच्छिन्ने, तादृश- अश्वत्वादि- विशेषधर्मावच्छिन्न-इत्रभेदानुमापिका एव भवति।

भोः, इतरव्यावृत्त्या इतरव्यावृत्तिः अनुमीयते इति कथमिदं सङ्गच्छेत। गौः इतरभिन्ना इतरभेदवत्त्वात् इत्यत्र पूर्वमेव पक्षे साध्यनिश्चयात् सिद्धसाधनदोषग्रस्तः तव पक्षः।

भगो! मैवम्। अयं दोषायेत प्राचां मते। अस्माभिः तु **शिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता**[3] इति सिद्धान्तितम्। तथा हि सिद्धेः सत्त्वेऽपि सिषाधयिषाविरहत्वस्य प्रकृते अभावात्, विशेष्याभावप्रयुक्तविशिष्टाभावः अत्र् अवर्तते इति कृत्वा पक्षता वर्तते। तस्मान्न दोषः। एवं गोत्वादिकमपि व्यावर्तकमेव इति इदानीमपि त्वदुक्ता अतिव्याप्तिः असङ्गता एव।

लक्षणलक्षणे क्रियमाणे इतरव्यावृत्तिः त्स्य प्रयोजनम् इति उह्यमाने सास्नादिमत्त्वं पक्षीकृत्य लक्ष्यतावच्छेदकसमनियतत्वेन इतरभेदानु-मापकत्वं साध्यते, अर्तात् सास्नादिमत्त्वं गवेतरभेदानुमापकं गोत्वसमनियतत्वात् इति अनुमानं प्रयुज्यते। अत्र च यत्र यत्र गोत्वसमनियतत्वं तत्र तत्र गवेतरभेदानुमापकत्वम् इति विशेषव्याप्तिः न सम्भवति इति कृत्वा यः यत्समनियतः सः तदितरभेद- अनुमापकह् इति सामान्यव्याप्तिः अभ्युपगन्तव्या। तथा हि अनया व्याप्त्या व्यावृत्तिं पक्षीकृत्य इतरभेदानुमापकत्वे साध्यमाने व्यावृत्तेः व्यावृत्तिज्ञानजनकत्वस्य सिद्धत्वात् सिद्धसाधनं दोषः। एवं अभिधेयत्वादौ पक्षे सति तदितरस्य एव अभावात् तदितरभेदानु-मापकत्वं वक्तुमेव न शक्यते इति साध्याप्रसिद्धिदोषः। तस्मात्

व्यतिरेकव्यभिचारः अत्र सञ्जायते इति कृत्वा व्यावृत्तिप्रमेयत्वादीनाम् इतरभेद- अनुमापकतया लक्षणलक्षणलक्ष्य- कोटौ अनन्तर्भावात् तत्र च लक्ष्यतावच्छेदक- समनैयत्यस्य सत्त्वेन अतिव्याप्तिः भवत्येव।

अपि च, तुष्यतु दुर्जनन्यायेन लक्षणलक्षणलक्ष्यतावच्छेदकं व्यावर्तकत्वं स्वीक्रियते चेदपि लक्षणम् अनुपपन्नं भवति। तत्र ज्ञ्यातं यद् अधिकरनं तज्ज्ञ्यानेन लक्षणस्य ज्ञ्यानं, लक्षणज्ञ्यानेन च तदाश्रयबोधः इति वक्तव्यं स्यात्। तथा च अन्योन्याश्रयदोषग्रस्तः अयं पक्षः। पृथिव्यां ज्ञातायाम् सा गन्धवती इति ज्ञ्यानं, गन्धवत्त्वे च ज्ञाते पृथिवीत्ववतः ज्ञानम् इति इतरेतराश्रयः।

अधिकरणज्ञानाभाववान् कदाऽपि लक्षणवाक्येन बोधनीयः न भवति। किन्तु यः प्रमाता, सः आदौ अधिकरणज्ञानं, तदनु च लक्षणज्ञानं प्राप्नोति इति नेतरेतराश्रयः।

अस्मिन् मते अपि दोषाः तदवस्थाः एव। तथाऽपि ज्ञाते अधिकरणे लक्षणम् अपि यदि प्रागेव ज्ञातं, तर्हि लक्षणवाक्यप्रतिपादनस्य वैयर्थम्। लक्षणे अज्ञाते च लक्षणवाक्येन प्रतिपत्त्यभावः, यथा सास्नादेः अज्ञातत्वे सास्नादिमत्त्वबोधाभावः।

भोः! अत्र स्पष्टीक्रियते **"न च सर्वे व्यामूढाः येन प्रतिपाद्यप्रतिपादकभावः न स्यात्"**[4] इति उदयनाचार्योक्त्या स्फुटीभवति। वस्तुतः लक्षणं जानानः अपि तद् लक्षणं लक्ष्यविशेषे अजानानः पुरुषः लक्षणवाक्यप्रतिपाद्यः भवति। यथा सास्नादिं जानानः सास्नादेः गवि आश्रितत्वम् अजानानः सास्नादिमत्त्वं गोर्लक्षणम् इति लक्षणवाक्यप्रतिपादनीयो भवति। तस्मात्, अवश्यं लक्षणवाक्यं घटते।

इदम् अयुक्तम्। त्वदुक्तलक्ष्यविशेषः इतरव्यावृत्ततया ज्ञातो वा न वा इति विकल्प्य दूषणं क्रियते। आद्ये, इतरव्यावृत्ततया ज्ञाते लक्षणाभिधानं व्यर्थमेव। पूर्वम् उत्पन्नम् इतरव्यावृत्तिज्ञानम् अपि लक्षणेनैव इति चेत्, पूर्वोक्तरीत्या चक्रकादिदोषापत्तिः। मानान्तरेण ज्ञातं चेत्, मानज्ञाम्नस्य अपि मानान्तरलक्षणादिज्ञानजन्यत्वेन अनवस्था अपि।

एवं तर्हि ज्ञातस्य लक्षस्य स्वरूपमेव लक्षणत्वेन अभ्युपगच्छामः यने लक्षणज्ञानस्य इतर-अनधीनत्वात् अनवस्थादिदोषाः निवार्येरन्।

मैवम्! असम्भवदुक्तिकम् इदं यत् स्वरूपमेव लक्षणं भवति इति। तथा सति इदं लक्ष्यम् इदं च लक्षणम् इति भेदव्यवहारः एव नोपपद्येत। एवं भेदव्यवहारे अङ्गीकृते अपि दोषः एव। यदि लक्ष्य- तत्स्वरूपयोः अत्यन्तम् अभेदः, तर्हि उक्तरीत्या व्यवहार- अनुपपत्तिः। भेदाभेदोऽपि नाङ्गीक्रियते। भेदः अभेदश्च विरुद्धौ। तदभ्युपगमे तु अनिर्वचनीयत्वम् इति अनिष्टप्रसङ्गः। अत्यन्ताभेदे तु पुनस्तल्लक्षणस्य इतरव्यावृत्ततया ज्ञानं च इतरलक्षणमानाद्यधीनम् इति पूर्वोक्तदोषाः पुनरुत्तिष्ठन्ते।

द्वितीये तु, लक्ष्ये अव्यावृत्ततया ज्ञाते इतरस्मिन्नपि लक्षणाश्रयत्वप्रतीत्या पुनः वैयर्थ्यमेव इति उभयतः पाशारज्जुः।

भवतु नाम त्वदुक्तं यत् इतरव्यावृत्ततया लक्ष्ये ज्ञाते सति अनवस्थापत्तिः इति। किन्तु इतर-अव्यावृत्ततया लक्षणे ज्ञाते तं प्रति लक्षणवाक्ये प्रतिपाद्यमाने कोऽपि दोषः न सम्भवति। **"लक्षणरूप-विशेषदर्शनाभावात् प्राक् धर्मिज्ञानस्य व्यामुग्धत्वे अपि तत्सकृतधर्मिज्ञानस्य अतथात्वम्"**[5] इत्युक्तम्। प्रत्यक्षादिना जले गन्धाभावं निश्चिनोति। ततः गन्धवती पृथिवी इति लक्षणवाक्येन प्रतिपन्नो भवति। ततः गन्धवत्त्वेन पृथिवीमेव ज्ञास्यति, न तु जलम्।

यदि गन्धवत्त्वावच्छेदेन पृथिवीज्ञानं केवलं स्यात्, तर्हि गन्धवत्वे व्याप्यत्वज्ञानं केवलं भवति, न तु व्यापकत्वज्ञानम्। अतः जले गन्धवत्त्वप्रतीतिः तव आक्षेपः सङ्गच्छेत। किन्तु गन्धवती पृथिवी लक्षणवाक्येन पृथिवीत्वावच्छेदेन गन्धमपि ज्ञास्यति येन गन्धवत्त्वे व्यापकत्वज्ञ्यानमपि जायते। अतः गन्धाभाववति जले पृथिवीत्वग्रहः असम्भवः एव।

एवमपि भवितुं नार्हति। जले गन्धवत्त्वप्रतीतिः जायते एव। जलगतधर्मभेदस्य गन्धे अगृहीतत्वात् गन्धस्य जले अवृत्तित्वज्ञानस्य असम्भवः। गन्धे इतरभेदः प्रागेव गृहीतः इति यदि त्वया उच्यते, तर्हि तादृशभेदोऽपि लक्षनान्तरमानान्तराधीनः एव इति पूर्वोक्तरीत्या एव अनवस्थाप्रसङ्गः। किञ्च को वा मूढः यया साम्ग्र्या जले गन्धाभावं गृह्णाति, गन्धं पृथिवीं च इतरव्यावृत्ततया जानाति तया एव सामग्र्या गन्दवति पदार्थे पृथिवीत्वं प्रत्येतुं न पारयेत्? तस्मात्, व्यावर्तकं लक्षणम् इत्येतत् अनुपपन्नम् एव।

एवं चेदपि व्यवहारसाधनं लक्षणम् इति निरस्तुं नैव शक्यते। इन्द्रियार्थसन्निकर्षजन्यत्वं यत्र वर्तते, तत् प्रत्यक्षत्वेन व्यवहर्तव्यम् इति शब्दव्यवहारार्थं लक्षणस्य नितराम् आवश्यकता वर्तते। तस्मात् लक्षणवाक्याभिधानं युक्तम् एव।

इदमपि न भवति। इन्द्रियार्थसन्निकर्षजन्यत्वस्य एव ज्ञातुम् अशक्यत्वात् इदं ज्ञानं प्रत्यक्षत्वेन व्यवहर्तव्यम् इन्द्रियार्थसन्निकर्ष-जन्यत्वात् इत्यत्र हेतोः एव अप्रसिद्धौ अनुमितिरेव न जायते।

ननु, इन्द्रियार्थसन्निकर्षजन्यत्वं ज्ञातुं न शक्यते इति तु न वाच्यम्। साक्षात्कारित्वाद्यखण्डोपाधिना तत्र इन्द्रियार्थसन्निकर्शजन्यत्वं ज्ञायते, यस्य च हेतुत्वे प्रत्यक्षत्वव्यवहारः अनुमातुं शक्यते।

एवं सति साक्षत्कारित्वम् इति अखण्डोपधिरेव तत्र हेतुः भवितुम् अर्हति। साक्षात्कारित्वादेव प्रत्यक्षत्वव्यवहारः अनुमातुं शक्यते इत्यतः इन्द्रियार्थसन्निकर्षजन्यत्वे ज्ञाते तदनु प्रत्यक्षत्वव्यवहारः औमीयते इति गौरवात् असङ्गतम्। तस्मात् व्यवहारसाधकम् अपि लक्षणम् अनुपपन्नमेव। तथा च व्यवहार-व्यावृत्ति-अन्यतरप्रयोजनकम् अपि लक्षणम् अनर्थकमेव इति यथामति लक्षणलक्षणविचारं प्रस्तूय वाग्व्यापारात् विरम्यते।

**उपसंहारः**

प्रस्तुतविमर्शस्य परिशीलनात् लक्षणविषये प्रचलितानां सामान्य-धारणानां पुनर्विचारस्य आवश्यकता सुस्पष्टा भवति। यद्यपि न्यायपरम्परायां पदार्थस्वरूपनिर्णये लक्षणस्य महत्त्वं बहुधा प्रतिपादितम्, तथापि तस्य सर्वत्रानिवार्यता निःशेषतया नोपपद्यते इति अस्मिन् अध्ययनक्रमे प्रदर्शितम्। विशेषतः खण्डनखण्डखाद्ये प्रतिपादितयुक्तीनां समीक्षणेन ज्ञायते यत् पदार्थज्ञानोत्पत्तिः सर्वदा लक्षणापेक्षया एव भवतीति नियमः नास्ति। यदि लक्षणज्ञानं विना वस्तुनः प्रतीतिः न स्यात्, तर्हि प्रागवस्थायां प्रथमवारं कस्यापि पदार्थस्य ज्ञानं कथं सम्भवेत्? अयमेव बिन्दुः अद्वैतवेदान्ते तार्किकपद्धत्या सुदृढं स्थापितः अस्ति।

व्यवहारे बहुषु स्थलेषु लक्षणज्ञानाभावेऽपि पदार्थप्रतीतेः प्रत्यक्षदर्शनात् लक्षणस्य प्रयोजनं व्यावहारिकभेदबोधाय सहायकत्वेन स्वीकरणीयं, न तु सर्वज्ञानजननस्य अनिवार्यकारणत्वेन। यत्र कुत्रचित् लक्षणं विनापि केवलं संस्कारबलेन नामरूपज्ञानेन वा लोकव्यवहारः सुचारुतया प्रचलति। अतः प्रस्तुतस्य गवेषणात्मकस्य अध्ययनस्य मुख्यनिष्कर्षः अयमेव यत् लक्षणस्य उपादेयत्वेऽपि तदपेक्षाया अनिवार्यता सर्वत्र न सिद्ध्यति। एषा दृष्टिः भारतीयतर्कपरम्परायां ज्ञानस्वरूपविमर्शस्य सूक्ष्मतां विचारगाम्भीर्यं च प्रदर्शयन्ती भाविचिन्तनायापि नूतनं सरलं च विमर्शमार्गं प्रदर्शयति। एतेन चिन्तनेन दार्शनिकचर्चासु लक्षणस्य वास्तविकं व्यावहारिकं च सीमाङ्कनं सुस्पष्टं भवति, येन ज्ञानमीमांसायां नूतना क्रान्तिः दृश्यते॥

**साहाय्यकग्रन्थसूची**


- तर्कसङ्ग्रहः - अन्नम्भट्टः
- न्यायबोधिनी - गोवर्धनसुधीः
- तर्कसङ्ग्रहदीपिका - अन्नम्भट्टः
- नीलकण्ठी - नील्कण्ठाचार्याः
- खण्डनखण्डनखाद्यम् - श्रीहर्षः
- श्रीमद्भागवतपुराणम् - वेदव्यासः


**पाद टिप्पणी**

[1] ऋग्वेदभाष्यम् - सायणाचार्याः।

[2] दीपिका, नीलकण्ठी।

[3] तर्कसङ्ग्रहदीपिका - अनुमानपरिच्छेदः

[4] खण्डनखण्डखाद्यम्, शारदा

[5] खण्डनखण्डखाद्यम्(शारदा)